# भाषाविज्ञानम् अष्टाध्यायी च

**डॉ. देवदत्त सरोदे**
सहायकाचार्यः, के.सं.वि., पुरी

**सारांशः**

*भाषाविज्ञानस्य मूलभूताः चतस्रः शाखाः सन्ति । १.ध्वनिविज्ञानम् Phonetics २.शब्दरूपविज्ञानम् Morphology ३.अर्थविज्ञानम् Semantics ४.वाक्यविज्ञानम् Syntax च । पाणिनीव्याकरणे एतासां चतसृणां शाखानां बहूनि प्रमाणानि विलोक्यन्ते । पाणिनिना भाषास्वरूपं यथायथं परिरक्षितुं परिकरबन्धः कल्पितः । एतस्मिन् परिकरबन्धे पाणिनेः भाषाविज्ञानं स्फुटम् आविर्भूतं तदेतद् सारसंक्षेपेण अस्मिन् शोधपत्रे ईक्षामहे ।*

## प्रस्तावना

मानवः सामाजिकप्राणी विद्यते । अतः समाजे परस्परं व्यवहर्तुं स्वीयविचारभावनामनोगतान् अभिव्यञ्जयितुं सम्प्रेषयितुं च किञ्चन समुचितं साधनमपेक्षितं तद् साधनं भाषेति वक्तुं शक्यते । भाषा नाम विचारभावनानुभवानां परस्परं विनिमयार्थम् अन्योन्यप्रयोजनसम्पादनायोपयुज्यमानं प्रभावि साधनम् । अथवा भाषेति भावसञ्चारस्य समुचितं साधनम् । भाषेति पदं **भाष व्यक्तायां वाचि** इत्यस्माद् धातोः निष्पद्यते । भाष्यते व्यक्तवागिति भाषा तथा च भाष्यकारः **व्यक्ता वाचि वर्णा येषां त इमे व्यक्तवाचः** अथवा **भाषणात् भाषेत्याहुः** ।

भाषावैज्ञानिकः स्वीट् महोदयः भाषामेवमाह - **ध्वनिभिः मानवीयविचाराणां बौद्धिकाभिव्यक्तिरेव भाषा**

Language may be defined as the expression of thoughts by means of speech sound – **Sweet.**

प्रसिद्धः पाश्चात्यदार्शनिकप्लेटो महोदयः **भाषामेवमाह विचारः आत्मनः अध्वन्यात्मकः संवादः यदायमेव ध्वन्यात्मकः संवादः भवति तर्हि भाषेति उच्यते** ।

प्राचीनसंस्कृतवाङ्मये भाषायाः उल्लेखः बहुत्र दरीदृश्यते । तद्यथा

**संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः ।**
**वाचं पर्जन्यजिन्वितां प्रमण्डूका अवादिषुः** ॥१॥॥ ऋ ७. १०३.१

**यावद्बै ब्रह्म विष्ठितं तावती वाक्** – ऐ. आ. १.३.८ यावद् पर्यन्तं ब्रह्म व्याप्तं तावद् पर्यन्तं वाक् व्याप्तेत्यर्थः । **तिस्रोवाचः निहिता अन्तरस्मिन् तासामेका निपपातानुघोषम्** । अथर्व ७.४३.१ परा, पश्यन्ति, मध्यमा, वैखरी च इति चतस्रो वाचः तासु तिस्रो वाचः अन्तरस्मिन् स्थिता भवन्ति एका वैखरी सघोषा बहिरायाति इति ।

**भाषाविज्ञानम्** –

भाषाविज्ञानं नाम भाषाया:, भाषाणाम् उत्पत्ति:, विकास:, परिवर्तनम्, ऐतिह्यं, संरचना, ध्वनि:, वर्णा:, पदानि, अर्था:, वाक्यानि, इति एतेषां विस्तरश: अध्ययनं तुलनात्मकम् अनुसन्धानं तद् भाषाविज्ञानम्, अथवा भाषाविज्ञानं नाम भाषाया: कृत्स्नवैज्ञानिकाध्ययनम्। भाषाविज्ञानस्य बह्व्य: शाखा: सन्ति। तासु प्रसिद्धाः चतस्र: शाखा अधोलिखिता: सन्ति।

१. ध्वनिविज्ञानम् Phonetics

२.शब्दरूपविज्ञानम् Morphology

३. अर्थविज्ञानम् Semantics

४. वाक्यविज्ञानम् Syntax

भाषाविज्ञानस्य चिन्तनं भारते अतिप्राचीनकालादारब्धं तद्यथा - **ते देवा इन्द्रमब्रुवन् इमां नो वाचं व्याकुरु इति तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्।** तै.७.४.७॥ **सा वै वाक् सृष्टा चतुर्धा व्यभवत्। एषु लोकेषु त्रीणि तुरीयाणि। पशुषु तुरीयम्।** मैत्रायणी संहिता १.११.५., निरुक्तम् १३.९

गोपथब्राह्मणे तु भाषाविज्ञानस्य पारिभाषिकपदावली प्रदत्ता तद्यथा **ओंकारं पृच्छाम: को धातु: ? किं प्रातिपदिकम् ? किं नामाख्यातम् ? किं वचनम् ? का विभक्ति: ? क: प्रत्यय: ? क: स्वर: उपसर्गो निपात: ? किं वै व्याकरणम् ? को विकार: ? को विकारी ? कति मात्रा ? कति वर्ण: कत्यक्षर: ? कति पद: ? क: संयोग: ? किं स्थाननादानुप्रदानानुकरणम् ?** इति गोपथब्राह्मणस्योद्धणेन सुतरामेतत् स्पष्टीभवति यद् भाषाविज्ञानं कियद् विकसितमासीतिति।

षट्सु वेदाङ्गेषु शिक्षा व्याकरणं निरुक्तम् इति त्रिषु वेदाङ्गेषु पुष्कलं भाषाविज्ञानस्य चिन्तनं विलोक्यते। छन्द:शास्त्रेऽपि भाषाविज्ञानस्य प्रमाणानि द्रष्टुं शक्यन्ते। शिक्षेति वेदाङ्गे वर्णध्वनिविषये सुष्ठु स्फोरितम्। व्याकरणे पदविज्ञानं प्रधानतया विचार्यते अत एव सूत्रकार: आह **अथ शब्दानुशासनम्** इति। निरुक्तं तु अर्थविज्ञानमधिकृत्य प्रवर्तते। तथा च निरुक्ते **अर्थनित्य: परीक्षेत।**

**अष्टाध्यायी -** षट्सु वेदाङ्गेषु प्रधानं व्याकरणं तत्रापि पाणिनिना विरचितम् अष्टाध्यायी इति नाम्ना प्रसिद्धं पाणिनीयव्याकरणं सर्वाणि व्याकरणानि अतिशेते। अत्र अष्टौ अध्याया; ३२ पादा: ३९७८ सूत्राणि सन्ति। पाणिनीयव्याकरणे बहूनि भाषाविज्ञानस्य तत्त्वानि विमृष्टानि सन्ति। तद्यथा - वर्णध्वनिशब्दरूप-अर्थवाक्यादिविषये सूक्ष्मतया विचारो विहित:। अत एव भाषेति ग्रन्थस्य रचयिता ब्लुम्फ़िल्ड एवमाह - For no language of the past have we record comparable to Panini's record of his mother tongue, nor it is likely that any language spoken today will be so perfectly recorded.

**भाषाविज्ञानमष्टाध्यायी च -** भाषाविज्ञानस्य मूलभूता: चतस्र: शाखा: सन्ति।

१. ध्वनिविज्ञानम् Phonetics २. शब्दरूपविज्ञानम् Morphology

३. अर्थविज्ञानम् Semantics ४. वाक्यविज्ञानम् Syntax

पाणिनिव्याकरणे एतासां चतसृणां शाखानां बहूनि प्रमाणानि विलोक्यन्ते । पाणिनिना भाषास्वरूपं यथायथं परिरक्षितुं परिकरबन्ध: कल्पित: । एतस्मिन् परिकरबन्धे पाणिने: भाषाविज्ञानं स्फुटम् आविर्भूतं तदेतद् सारसंक्षेपेण अस्मिन् शोधपत्रे ईक्षामहे । आदौ तावत्

**१. ध्वनिविज्ञानम् Phonetics** - पाणिनिना अष्टाध्याय्याम् अक्षरसमाम्नाये स्वरव्यञ्जनानामुपदेशोऽकारि । इमानि स्वरव्यञ्जनानि चतुर्दशप्रत्याहारसूत्रेषु विशिष्टक्रमविन्यासे प्रयोजनं मनसि निधाय उपन्यस्तानि सन्ति । यद्यपि पाणिनीयशिक्षाग्रन्थे वर्णानामुपदेशो विद्यते । तत्र वर्णा: त्रिषष्टि: इति २२ स्वरा: ३३ व्यञ्जनानि, ८ अयोगवाहा: परिगणिता: । इह प्रतिवर्णं ध्वनिविशेषो विद्यते । अत: ध्वनयोऽपि त्रिषष्टि: भवितुम् अर्हन्ति किञ्च संस्कृतभाषण-श्रवण-पठन-लेखनेषु क्वापि संशीति: असौकर्यं न भवति भारतीयवैयाकरणानां सूक्ष्मध्वनिचिन्तनं वीक्ष्य W.S.Allen महोदय: स्वीये **Phonetics in ancient India** इति ग्रन्थे एवमाह

'Our phonetic categories and terminology owe more than is perhaps generally realized to the influence of Sanskrit phoneticians'.

किन्नु खलु ध्वनिविज्ञानम् ? ध्वनिविज्ञानं नाम ध्वनीनाम् उत्पत्ति:, बोध:, लिखिताङ्कनं, सम्प्रेषणं, वर्गीकरणं, विश्लेषणम् इत्यादिविषयाणां विचारो विधीयते ।

**Phonetics** – 'The science or study of speech sounds and their production, transmission and perception and their analysis classification and transcription.'

प्रत्याहारसूत्रेषु ९ स्वरा:, ३३ व्यञ्जनानि सन्ति । अयोगवाहा: **(अयोगवाहा: विज्ञेया आश्रयस्थानभागिन: ।** पा.शि.श्लो.२२) अत्र न परिगणिता: न च स्वराणां दीर्घप्लुता:, अत: अक्षरसमाम्नाये वर्णा: ४२ सन्ति । एतेषु ए, ओ, ऐ, औ अकारेकारयो: अकारोकारयो: सन्धिरूपाणि सन्ध्यक्षराणि इति आहत्य ३८ मुख्या वर्णा: तस्मात् एते एव मौलिकध्वनय:। प्रत्याहारसूत्रेषु शास्त्रलाघवाय प्रत्याहारार्थं योऽयं क्रम: वर्णानां विरचित: स च क्रम: भाषाविज्ञानस्य सुसूक्ष्मज्ञानमन्तरेण भवितुं नार्हति । प्रत्याहारै: सन्धिकार्यं षत्वणत्वप्रत्ययादिविधानं सुकरं भवति, यथा अर्वाचीनभाषाविज्ञाने **ग्रिमनियम:**, **वर्नरनियम:** तथा प्राचीनव्याकरणशास्त्रे पाणिनीये ध्वनिवर्णस्वरसन्ध्यादिविषयका नैके नियमा: सन्ति । अष्टाध्यायी वैदिकलौकिकशब्दानां व्याकरणं विद्यते यथा- **यज्ञकर्मण्यजपन्यूङ्खसामसु** अष्टा.१.२.३४. यज्ञकर्मणि उदात्तानुदात्तस्वरितानाम् एकश्रुति: भवति जपन्यूङ्खसामानि वर्जयित्वेति स्वरनियम: **हृग्रहोर्भश्छन्दसि** अष्टा. हकारस्य भकारादेश: ध्वनिवर्णपरिवर्तननियम: विहित: एवमत्र लोके वेदे च विद्यमानाः स्वरध्वनिनियमा: सूचिता: । लौकिकसंस्कृते प्रादेशिकभेदेन स्वरभेद:कथं भवति तद् **उदक्च विपाश:** अष्टा.४.२.७४ इति सूत्रे वर्णितम् । **तुल्यास्यप्रयत्नं सवर्णम्** अष्टा.१.१.९ इति सूत्रेण वर्णानां समानस्थानप्रयत्नवतो: मिथ: सवर्णत्वम् उक्तम् एतेन वर्णानां समानजातीयकत्वम् दर्शितम् ।

**अष्टाध्याय्यां वर्णविकार: वर्णपरिवर्तनम् -**

**अवर्णस्थाने आकार:** [वृद्धि:]- पठ ण्वुल् – पठ अक – पाठक: **अत: उपधाया:** अष्टा.७.२.११६ इति अवर्णस्थाने आकार: [दीर्घ:]— बालक भ्याम् – बालकाभ्याम्, **सुपि च** अष्टा.७.२.१०२ पठ मि – पठामि **अतो दीर्घो यञि** अष्टा.७.३.१०१

**आवर्णस्थाने अकार:** [ह्रस्वः] दा दा- ति = ददाति **ह्रस्वः** अष्टा.६.४.२, गोशाला – **गोशालं विभाषासेनासुर**…… अष्टा.२.४, २५

**अकाराकारयो: स्थाने प्लुत:** देवदत्त३ **दूराद्धूते** अष्टा.८.३.८४ रा३म **गुरोरनृतो** ….. अष्टा.८.२.८६

**अकाराकारयो:लोप:** ज गम् - अतुस् = जग्मतु: **गमहनजनखनघसां लोप: क्ङित्यनङि** अष्टा.६.४.९८ नामन्- अ: = नाम्न: हरे –अव = हरेव **एङः पदान्तादति** अष्टा.६.१.१०७ द दा – त: = दत्त: **श्नाभ्यस्तयोरात:** अष्टा.६.४.११२ प पा - अतुस् = पपतु:, द्वि –पा – अ= द्विप: **आतो लोप इटि च** अष्टा.६.४.६४ नि –धा –इ = निधि:, अस् – त: = स्त: **घ्वसोरेद्धावभ्या……..** अष्टा.६.४.११९

**अकाराकारयो: स्थाने इकार:** प पा सा = पिपासा **सन्यत:** अष्टा.७.४.७९ अतिष्ठपत्—अतिष्ठिपत् **तिष्ठतेरित्** अष्टा.७.४.५

**इवर्णस्थाने ईकार:** कृषि –वल = कृषीवल: वले अष्टा.६.३.११८ अग्नि- सोम =अग्नीषौमौ **ईदग्ने: सोमवरुणयो:** अष्टा.६.३.२७ क्षि-त =क्षीण: **क्षिय:** अष्टा.६.४.६० वि जि जि-स=विजीगिषा **अज्झन-गमां सनि** अष्टा.६.४.१६ निर् – रोग: = नीरोग: **ढ्रलोपे पूर्वस्य दीर्घोऽण:** अष्टा.६.३.११

**ईवर्णस्थाने इकार:** विदुषी-तरा =विदुषितरा उगितश्च: अष्टा.६.३.४५ हे नदी =हे नदि **अम्बार्थनद्योर्ह्रस्व:** अष्टा.७.३.१०७ नी नी सति=निनीषति **ह्रस्व:** अष्टा.७.४.५९

**इवर्णस्थाने अकार:** अग्नि औ = अच्च घे: अष्टा.७.३.११९ शिंशपा=शांशप: **देविकाशिंशपादित्यवाट्**… अष्टा.७.३.१ द्वि दश –द्वादश **द्व्यष्टन: संख्यायाम……..** …. अष्टा.६.३.४७

**इवर्णस्थाने उवर्ण:** पच ति = पचतु **एरु:** अष्टा.६.३.८६ पठति = पठतु

**इवर्णस्थाने एकारादेश:** जेता, नेता, देव: , **पुगन्तलघूपधस्य च** अष्टा.६.१.८७

**इवर्णस्थाने ऐकारादेश:** नैतिकं, धैर्यं , दैनिकं , **तद्धितेष्वचामादे:** अष्टा.७.२.११७

**इवर्णस्थाने औकार:** सख्यौ पत्यौ **औत्** अष्टा.७.३.११८

**इवर्णस्य लोप:** नदी = नादेय: , अतिथि: = आतिथेय: **यस्येति च** अष्टा.६.४.१४८ **इवर्णस्य आगम:** पत-त = पतित: **आर्धधातुकस्येड् वलादे:** अष्टा.७.२.३५ आसीत् अस्तिसिचोऽपृक्ते ग्रहीष्यति **ग्रहोऽलिटि दीर्घ:** अष्टा.७.२.३७ इकारस्थाने यकार: अति-आचार: = अत्याचार:, नदी-अम्बु: = नद्यम्बु: **इको यणचि** अष्टा. ६.१.७७

**उवर्णस्यस्थाने अकार:** भू भू – अ = बभूव **भवतेर:** अष्टा.७.४.७३ स्थूलदूरअष्टा.६.४.१५६ गुरिष्ठ = गरिष्ठ **स्थूलदूर** …..अष्टा.६.४.१५६

**ऋवर्णस्थाने आकार:** मातृ पितरौ = मातापितरौ **आनङ् ऋतो द्वन्द्वे** अष्टा.६.३.२५

**ऋवर्णस्थाने इकार:** भृ भृ ति = बिभर्ति **भृञामित्** अष्टा.७.४.७६ ऋवर्णस्थाने उकार: पृ त: = पूर्ण: पृ ति = पूर्ति: **उदोष्ठ्यपूर्वस्य** अष्टा.७.१.१०२

**एवर्णस्थाने अय्** ने – अनम् = नयनम् **एचो यवायाव:** अष्टा.६.१.७८

**एवर्णस्थाने इकार:** सेव् सेव् अ [णल्] सिषेव ह्रस्व: अष्टा.७.४.५९

**ऐवर्णस्थाने इकार:** अतिरै =अतिरि कुलम् **एच इग्घ्रस्वादेशे** अष्टा.१.२.४७

**ऐ स्थाने आय्** नै-अक = नायक: **एचो यवायाव:** अष्टा.६.१.७८

**ओकारस्थाने उकार:** लोक्- लोक् अ [णल्]= लुलोक **एच इग्घ्रस्वादेशे** अष्टा.१.२.४७

**औकारस्थाने उकार:** अतिनौ = अतिनु कुलम् **एच इग्घ्रस्वादेशे** अष्टा.१.२.४७

**कवर्गस्थाने चवर्ग:** कृ कृ अ [णल्] कृ कार=चकार: **कुहोश्चु:** अष्टा.७..४.६२

**चवर्गस्थाने कवर्ग:** पच् घन् – पच् अ = पाकपच् त् = पक्व: : **चजो: कु घिण्यतो:** अष्टा. ७.३.५२

**जकारस्थाने षकारादेश:** भ्रस्ज् त = भ्रष्ट: सृज् ति = सृष्टि: यज् ति = यष्टि: **व्रश्चभ्रस्जसृजमृ......**अष्टा.८.२.३६

**छकारस्थाने शकारादेश:** प्रछ् न = प्रश्न: **च्छ्वो: शूडनुनासिके च** अष्टा.६.४.१९

**टवर्गस्य ण आगम:** सुगण् ट् षष्ठ: सुगण् णीश: **ङमो ह्रस्वादचि...** अष्टा.८.३.३२

**तवर्गस्य चवर्ग:** उत् –चारणम् = उच्चारणम् , सत् जन: =सज्जन: **स्तो: श्चुना श्चु:** अष्टा. ८.४.४०

**तवर्गस्य टवर्ग:** उत् टङ्कणम् = उट्टङ्कणम्, इष् – त = इष्ट: , तुष् – त = तुष्ट: । **ष्टुना ष्टु:** अष्टा.८.४.४१

**तवर्गस्य लकार**: उत् – लास; = उल्लास: तत् – लीन: = तल्लीन: **तोर्लि** अष्टा.८.४.६०

**तकारस्य ककारादेश:** शुष् – त = शुष्क: **शुष: क:** अष्टा.८.२.५७

**तकारस्य वकारादेश:** पच् – त = पक्व: **पचो व:** अष्टा. ८.२.५२

**तकारस्य मकारादेश:** क्षि- त = क्षाम: **क्षायो म:** अष्टा.८.२.५३

**तकारस्य नकारादेश:** छिद्- त = छिन्न: **रदाभ्यां निष्ठातो न: पूर्वस्य च द:** अष्टा. ८.२.४२

**तकारस्य सकारादेश:** बृहस् - पति = बृहस्पति:

**धकारस्य हकारादेश**: धि त = हित: **दधातेर्हि** अष्टा.७.४.४२

**नकारस्य तकारादेश:** हन्-अ =घात: **हनस्तोऽचिण्णलो:** ..... अष्टा.७.३.३२

**तकारस्य आगम:** आ-गम्-क्त्वा = आगत्य **ह्रस्वस्य पिति कृति तुक्** अष्टा. ६.१.७१ दि कृ क्विप् = दिनकृत् कर्मकृत्

**नकारस्य लोप:** हन- त = हत: **अनुदात्तोपदेशवनति..**अष्टा. ६.४.३७ राजन् कुमार = राजकुमार: **न लोप: प्रातिपदिकान्तस्य** अष्टा.८.२.७

**तथदस्थाने धकार:** दुह - त= दुग्ध: विध् त = विद्ध: , लभ् त = लब्ध: **झषस्तथोर्धोऽध:** अष्टा.८.२.४०

**नकारस्य णकार:** रामायनं — रामायणम्, स्मरनम् = स्मरणम् **अट्कुप्वाङ्नुम्व्यवायेऽपि** अष्टा.८.४.२

**पकारस्य तकार**: अप् – भ्याम् = अद्भ्याम् **अपो भि** अष्टा. ८.४.४८ पकारागम: दाण् णिच् ति = दापयति **अर्ति-ह्री-व्ली......** अष्टा.७.३.. ३६

**मकारस्य नकार:** शम् त: =शान्त: **मो नो धातो:** अष्टा.८.२.६४ सम् हार:= संहार: **मोऽनुस्वार:** अष्टा.६.१.१५

**अन्तस्था: य् व् र् इत्येतेषाम् इ उ ऋ -** व्यध् त: = विद्ध: **ग्रहिज्यावयिव्यधि...** अष्टा.६.१.१६ स्वप् त: = सुप्त: **वचिस्वपि**......अष्टा.६.१.१५, ग्रह त: = ग्रहीत: **ग्रहिज्यावयिव्यधि.....** अष्टा.६.१.१६

**अन्तस्थलोप:** हरे इह= हरय् इह = हर इह **लोप: शाकल्यस्य** अष्टा.८.३.१९ निर् रोग: = नीरोग: **रो रि** अष्टा. ८. ३. १४

**रेफस्य विसर्ग:** पुनर् = पुन: बालकर् = बालक: **खरवसानयोर्विसर्जनीय:** अष्टा. ८.३.१५

**रेफस्य लत्त्वम्** गिर् अ ति = गिलति ग र = गर: =गल: **अचि विभाषा** अष्टा.८.२.२१,

**शकारस्य षकार:** दृश् त = दृष्ट: नश् त = नष्ट: अष्टा. **व्रश्चभ्रस्जसृजमृज.** अष्टा.८.२.३६ दिश् = दिक्

**क्विन्प्रत्ययस्य कु:** अष्टा.८.२.६२ शकारस्य छकार: उत् – श्वास:= उत्छवास: शश्छोऽटि अष्टा.८.४.६३

**षकारस्य ककार:** शुष् क्स् स्य् ति= शोक्ष्यति **षढो** क: सि अष्टा.८.२.४१

**षकारस्य छकार:** इष् अ ति = इच्छति **इषुगमियमां छ:** अष्७.३.७७

**सकारस्य तकार:** वस् स्य ति = वत्स्यति सः स्यार्धधातुके अष्टा.७.४.४९ उत् स्थानम् = उत्थानम् **उदः** स्थास्तम्भो:.अष्टा. ८. ४. ६१

**सकारस्य शकार:** निस् चल् = निश्चल: **स्तो: श्चुना श्चु:** अष्टा. ८.४.४०

**हकारस्य ढकार:** गुह् =गूढ़:, लिह् त: =लीढ हो ढः अष्टा.८.२.३१

**हकारस्य घकार:** दुह् त =दुग्ध: कामदुघा **दुहः कब्घश्च** अष्टा. ३. २. ७० हकारस्य झकार: अच् हल् = अज्झलौ **कुहो श्चुः** अष्टा.७.४.६२

**हकारस्य धकार:** नह त = नद्धः **नहो ध:** अष्टा.७.३.४३

**हकारस्य पकार:** रोहयति = रोपयति **रुह: पोऽन्यतरस्याम्** अष्टा.७.३.४३

**हकारस्य चवर्ग:** जघान, जहार **कुहोश्चु:** अष्टा.७.४.६२

**सकारस्य नकार:** बालकास् =बालकान् **तस्माच्छसो नः पुंसि :**अष्टा. ६. १. १०१

इत्थं वर्णपरिवर्तनं ध्वनिपरिवर्तनं भवति तदिह दिन्मात्रं दर्शितम् । पाणिनिना सूक्ष्मेक्षिकया ध्वनिविज्ञाननियमा: अष्टाध्याय्यां प्रतिपादिता: ।

**पदविज्ञानम्, शब्दरूपविज्ञानम्** - पाणिनीयव्याकरणे पञ्चवृत्तय: विलोक्यन्ते ताश्च – कृद्वृत्तिः, तद्धितवृत्तिः, समासवृत्ति: एकशेषवृत्तिः, सनाद्यन्तधातुरूपवृत्ति: इति आसु आदित; तिस्र: वृत्तयः मुख्याः सन्ति, अत: एकस्मिन्नेव सूत्रे पाणिनिना एता: पठिता: कृत्तद्धितसमासाश्च इति प्रातिपदिकसंज्ञा विहिता, अन्ये द्वे वृत्ती उपर्जनीभूते स्त: । एकशेषवृत्तौ प्रातिपदिकात् सुबुत्पत्तिः भवति । सनाद्यन्तधातुभ्य: तिङ्प्रत्यया: जायन्ते । सुपां तिङां वृत्तौ गणना नास्ति । व्याकरणं शब्दस्वरूपसाधुत्वप्रतिपादनपरं शास्त्रम् अत: पाणिनि: सूत्रकार: **स्वं रूपं शब्दस्याऽशब्दसंज्ञा** अष्टा. १.१.६८ इति सूत्रयाञ्चकार । अत एव इह व्याकरणे अग्ने र्ढक् इति उच्यमाने अग्ने: शब्दादेव ढक्-प्रत्ययो भवति न तु वह्ने: न पावकात् न तु अग्निपदार्थात् । इत्थम्भूतशब्दरूपं साधु अन्यथा असाधु भवति इति धिया मुनिना पाणिनिना वर्णपरिवर्तनसम्बद्धाः नैके नियमा विहिता: लोके वेदे च यद् स्वरूपं शब्द: दृश्यते व्यवह्रियते तद्रूपशब्दसिद्धये तत्साधुत्वप्रतिपादनाय एव षत्व-णत्व-इडागम-वर्णपरिवर्तनानि सन्धिसूत्राणि व्यधायि सूत्रकारेण । शब्दस्तु प्रातिपदिकं, धातुभ्य: कृत्प्रत्यये सति कृदन्त: तच्च प्रातिपदिकं, प्रातिपदिकेभ्य: तद्धितप्रत्यये कृते सति तदपि प्रातिपदिकं भवति । द्वयो: बहूनां समर्थानां पदानां विधिर्भवति तदा समासो भवति तदपि प्रातिपदिकम् । समासस्य प्रयोजनम् एकपद्यमेकविभक्तित्वम् ऐकस्वर्यञ्च । समासस्य प्रातिपदिकत्वात् विभक्तिप्रत्यया: तत: पदसंज्ञा । सुप्तिङन्तं पदम् इति सुबन्तं तिङन्तं पदसंज्ञं भवति ।

धातुभ्य: कृत्-प्रत्यया: कृदन्ता:, प्रातिपदिकं, प्रातिपदिकेभ्य: तद्धितप्रत्यया: तद्धितान्ता: प्रातिपदिकानि, पदयो: पदानां समसनं समास: स च प्रातिपदिकं, धातुभ्यो णिच्, सन् … सनाद्यन्ता: धातव: तत: प्रत्यया:, नामवाचकशब्देभ्य: काम्यच्, क्यच्, क्यङ्, क्यष् तत: धातु: तत: प्रत्यया: । पदविज्ञाने शब्द: तस्य वर्णक्रमविन्यास: स्वर:, वर्णपरिवर्तनम्, धातु:, प्रत्यय:, अर्थ:, प्रकृति:, प्रत्यय:, प्रातिपदिकं प्रत्यय: एतत्सर्वं सूक्ष्मतया विचार्यते । पाणिनि: शब्दरूपसाधनाय कृत्प्रकरणं, तद्धितप्रकरणं, समासप्रकरणं, तिङ्प्रकरणं, सुप्प्रकरणम् आगमलोपः इड्नुम्षत्वणत्ववृद्धिगुणदीर्घसन्धिरित्यादीनां नैकेषां विषयाणां शास्त्रीयप्रतिपादनं चकार, **तुमर्थे सेसे......** अष्टा.३.४.९ इति एकस्मिन् सूत्रे १९ तुमर्थप्रत्यया: वेदे धातुभ्य: भवन्ति इति दर्शितम्

अनेन पाणिने: वैदिकलौकिकभाषाविज्ञानं कियत् गभीरमिति ज्ञायते । पाणिने: रचनाप्रतिभां वीक्ष्य सुतराम् एतत् प्रतिभाति यत् पाणिने: भाषाविज्ञानस्य ज्ञानमसाधारणमिति निश्चप्रचम्, अत एव भाष्यकार: पतञ्जलि: आह –**पाणिनीयं महत् सुविहितम्** इति ।

**अर्थविज्ञानम्** - **सिद्धे शब्दार्थसम्बन्धे** (महाभाष्यं पस्पशाह्निकम्) इति कात्यायनवार्तिकेन सुतरां स्पष्टीभवति यत् शब्दा नित्या: अर्था: नित्या: तेषां सम्बन्धोऽपि नित्य:, सिद्धे शब्दे अर्थसम्बन्धे च, नित्यः यतो हि अर्थवतामर्थैरभिसम्बन्ध: । तथा च भर्तृहरि:

**नित्या: शब्दार्थसम्बन्धा: समाम्नाता महर्षिभि: ।**
**सूत्राणां सानुतन्त्राणां भाष्याणां च प्रणेतृभि:॥** ब्रह्म.का.

शब्दार्थयो: सम्बन्ध: कार्यकारणभावेन योग्यताभावेन च भवति, पाणिनिनाऽपि **तस्येदम्** अष्टा.४.३.१२० इति सूत्रेण कार्यकारणभावसम्बन्ध: दर्शित:, **तदर्हति** अष्टा.५.१.६३, **तदर्हम्** अष्टा. ५.१.११७ इति आभ्यां सूत्राभ्यां योग्यताभावसम्बन्ध: सूचित: ।

ध्वनिरूपशब्द: क्षणप्रध्वंसी परन्तु बौद्धशब्द: तु नित्यो भवति । अर्थोऽपि वस्तुरूप: बौद्धश्च भवति । सर्वे शब्दा: येन प्रवृतिनिमित्तेनाथवा यस्य वाच्यार्थबोधाय प्रवर्तन्ते स एव प्रवृत्तिनिमित्तरूपार्थ: तस्य शब्दस्यार्थो भविष्यति, तथा च भाष्यकार: **स्वं रूपं शब्दस्याऽशब्दसंज्ञा** इत्यत्र **'अस्त्यन्यद् रूपात् स्वं शब्दस्येति ? किं पुनस्तत् ? अर्थ: । शब्देनोच्चारितेनार्थो गम्यते । गामानय दध्यशान इति अर्थ: आनीयते अर्थोभुज्यते ।** भाष्यकार: पतञ्जलि: शब्दं निरूपयन् भाष्ये एवमाह – **अथ गौरित्यत्र क: शब्द: ? किं यत्तत् सास्नालाङ्गूलककुदखुरविषाण्यर्थरूपं स शब्द: ? नेत्याह द्रव्यं नाम तत् । यत्तर्हि तत् शुक्लो नील:, कृष्ण: कपिल:, कपोत: इति स शब्द: ? नेत्याह, गुणो हि नाम स । यत्तर्हि तद्भिन्नेष्वभिन्नं छिन्नेष्वछिन्नं सामान्यभूतं स शब्द: ? नेत्याह आकृतिर्नाम सा, कस्तर्हि शब्द: ? येनोच्चारितेन सास्नालाङ्गूलककुद्खुरविषाणिनाम् सम्प्रत्ययो भवति स शब्द:** अनेन शब्दस्य अर्थोऽपि सूचित: । **अर्थस्तु वस्तुरूपपदार्थ: बौद्धश्च । चतुष्टयी शब्दानां प्रवृत्ति:, जातिशब्दा: गुणशब्दा: क्रियाशब्दा: यदृच्छा चतुर्धाः ।**

भाषाविज्ञानमते न कोऽपि शब्द: असाधु भवति । पतञ्जलिना यदृच्छाशब्दा: असाधव: इति मत्वा परित्यक्ता: परन्तु पणिनिना अर्थवदधातुरप्रत्यय: प्रातिपदिकम्, टि-घु-घेत्यादयः संज्ञा विहिता: आभि: प्रत्ययो जायते इष्टसिद्धिश्च भवति । वाचकशब्दा: चतुर्धा सन्ति । यौगिका: रूढा: योगरूढाः , यौगिकरूढा: इति । क्वचित् वस्त्वभावेऽपि शब्दमाहात्म्यात् अर्थप्रतिति: यथा - शशशृङ्ग: चैतन्यं पुरुषस्य स्वभाव: ।

महति शब्दनिचये अर्थनिश्चयस्तु दुष्करम् अत: भृर्तृहरिणा अर्थनिश्चयाय साधनानि सूचितानि ....

**संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।**
**अर्थ: प्रकरणं लिङ्गं शब्दस्यान्यस्यसन्निधि: ॥**
**सामर्थ्यमौचिती देश: कालो व्यक्ति: स्वरादय: ।**
**शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतव: ॥**

शाब्दबोधे कोऽयं बोध: ? बोध: नाम ज्ञानं प्रतितिर्वा ज्ञानं द्विधा अनुभवेन जायमानं ज्ञानं प्रथमं स्मृत्या जायमानं ज्ञानं द्वितीयम् । अनुभवद्विधा यथार्थानुभव: अयथार्थानुभवश्च यथार्थानुभवस्तु चतुर्धा विभज्यते । प्रत्यक्ष:, अनुमिति:, उपमिति:, शब्दः इति । एभि: ज्ञानस्रोतोभि: यथार्थानुभवो जायते । वाक्यार्थज्ञानमेव शाब्दबोध: अस्य प्रधानसाधनं शब्द:, शाब्दबोधे आकाङ्क्षा, योग्यता, आसत्ति:, तात्पर्यं च इति एतेषां ज्ञानेन शाब्दबोधो जायते । अर्थज्ञानस्य साधनत्त्वेन नैयायिका: शक्तिग्रहं मन्यन्ते । अमुकः शब्द: अमुकार्थं बोधयति इति वृत्तिज्ञानमेव शक्तिग्रह: तस्याष्टौ सधनानि ।

**शक्तिग्रहं व्याकरणोपमानकोषाप्तवाक्याद्व्यवहारतश्च ।**

**वाक्यस्य शेषाद् विवृत्तेर्वदन्ति सानिध्यत: सिद्धपदस्य वृद्धा:** ॥ शब्दशक्तिप्रकाशिका

पाणिनिना स्वीये शब्दानुशासने प्रातिपदिकार्थ:, प्रत्ययार्थ:, धात्वर्थ:, समासार्थ:, निपातार्थ: सूचिताः अन्ये च विशिष्टार्थे स्वरा: प्रत्यया: च विहिता: । यथा – कृत्-प्रत्यया: - कर्तरि कृत् , तयोरेवकृत्यक्तखलर्था:, समानकर्तृकयो: पूर्वकाले विशिष्टार्थे कृत्-प्रत्यया: - स्तम्बकर्णयो: रमिजपो: स्तम्बेरम: कर्णेजप:, तिङ्-प्रत्यया: - ल: कर्मणि च भावे चाकर्मकेभ्य: वर्तमाने लट्, विधिनिमन्त्रणा.. धातव: - *भू* – सत्तायाम्, *भाष* व्यक्तायां वाचि, *लिख* अक्षरविन्यासे । तद्धिता: - तस्यापत्यम्, तस्य विकार:, अदूरभवश्च, कृते ग्रन्थे, तत्र भव, तेन प्रोक्तम् । समास: - अव्ययं विभक्तिसमीपसमृद्धि… अनेकमन्यपदार्थे ।

**वाक्यविज्ञानम्** – वैयाकरणानां निकाये वाक्ये एव अर्थपरिसमाप्ति: वाक्यार्थे एव वैयाकरणानां समय: । पाणिनिनाऽपि सनादिषु वाक्यार्थे एव प्रत्ययविधानं कृतं तद्यथा – पठितुमिच्छति – पिपठिष्यति, तपश्चरति तपस्यति, कष्टं करोति – कष्टायते, पुत्रमिव आचरति शिष्यं गुरु: पुत्रीयति, पटपटाकृत्य, अङ्गीकृत्य इति । विद्यालयं गत्वा पाठं पठति इत्यादिषु वाक्ये एव प्रत्ययो विहित: । तद्धितप्रकरणे वाक्यार्थे एव प्रत्ययविधानं दृश्यते यथा - सुभद्रा प्रयोजनमस्य सौभद्र: संग्रामे प्रयोजनं योद्धृभ्य:, मथुरा निवासः अस्य माथुर: **सोऽस्य निवास:** अष्टा.४.३.८९ पञ्च अवयवा अस्य पञ्चतयं दारु **संख्याया अवयवे तयप्** अष्टा.५.२.४२ उद्गतं मन: यस्य उत्क: **उत्क: उन्मना:** अष्टा.५.२.८० दशरथस्यापत्यम् – दाशरथि: **अत इञ्** अष्टा.४.१.९२ समासान्तप्रकरणे यथा – पूर्वस्यां शालायां भव अत्र स्त्रीप्रत्यय: समास: तद्धित: सर्वम् एतत् मिश्रवाक्यरूपे विद्यते, पञ्चसु कपालेषु संस्कृत: पञ्चकपाल: ।

**समास:** - समस्तेऽपि वाक्यार्थबोध एव समासे विग्रह: वाक्यरूपं भवति यथा – राज्ञ: पुरुषः {अस्ति} राजपुरुष:, प्राप्तम् उदकं यं ग्रामं स प्राप्तोदक: ग्राम: ।

**कारकविभक्तिप्रकरणे** – वाक्यबोधमन्तरेण वाक्यविवक्षामन्तरेण कारकविधानं विभक्तिविधानं न शक्यं यथा – राम: पुस्तकं पठति इति कारकविभक्तौ तस्मै देवाय नम:, स्वस्ति ते भूयात् इति उपपदविभक्तौ वाक्यार्थे एव तात्पर्यम् । कर्तृवाच्यम्, कर्मवाच्यम्, भाववाच्यम् इत्यादिषु वाक्यार्थ: एव अभिप्रेत: । आत्मनेपदपरस्मैपदविधानमपि वाक्यार्थे एव तात्पर्यम्, यथा – माणवकमुपनयते, कन्या छात्राय तिष्ठते, शतं प्रतिजानीते, मुण्डो भीषयते । लकारविधानम् – यावद् भुङ्क्ते, पुरा भुङ्क्ते अवश्यं भोक्ष्यते, **यावत्पुरनिपातयोर्लट्** अष्टा.३.३.४, संभावयामि भुञ्जीत भोक्ष्यते भवान् **विभाषा धातौ** …..अष्टा.३.३.१५५, अपि गिरिं शिरसा भिन्द्यात्, अभेत्स्यत् भवान् **सम्भावनेऽलमिति चेत् सिद्धाप्रयोगे** अष्टा.३.३.१५४ इत्थं कारकविभक्तिकृत् तद्धित-समास-लकारादिषु प्रकरणेषु वाक्यविज्ञानं सम्यक् स्फोरितम् ।

अष्टाध्याय्या: आदित: आन्तं यावत् परिशीलनेन सुतरामेतत् ज्ञायते यत् पाणिनीयव्याकरणं भाषाविज्ञानस्य सर्वोत्कृष्ट: आकरग्रन्थो विद्यते इति प्रतिभाति, नास्ति द्वैतं विषयेऽस्मिन् विपश्चिदपश्चिमानाम् । अत एव वृत्तिकार: महता कण्ठेन उवाच – **महती सूक्ष्मेक्षिका वर्तते सूत्रकारस्य**....भाष्यकारोऽपि आह – **पाणिनीयं महत् सुविहितम्** इति आभ्यां वचनाभ्यां ज्ञायते यत् पाणिनीयं भाषाविज्ञानस्य प्रमाणभूतं पुस्तकमिति ।

J. R. Firth about Sir William Jones

"Without the Indian grammarians and Phoneticians whom he introduced and recommended to us it is difficult to imagine our nineteenth century school of Phonetics."

The Chinese and Assyrians did not penetrate so deeply into the understanding and analysis of their own language as did the early Indians whose grammatical investigations have had a far-reaching influence on European philology…. We find in India painstaking investigations into phonetics with a minute description of each sounds and its formation, further precise accounts of the changes of sounds in the inflection and formation of wards, What was studied was not only the role of sounds in isolated words, but also the modification which sounds underwent when words were pronounced in connected speech (Sandhi), each word was analyzed into its elements, root affixes to form stems and in flexional endings, and statistics were given of the occurrence of each of these elements. In this way the earliest contributions were given to the building up of an etymological science. **Among the Indian grammarians Panini ranks first, his work has been called the most complete grammar existing for any language dead or living**.

**सन्दर्भग्रन्था: -**


1. क्षेमकरणदास त्रिवेदी(सम्पा.), **गोपथब्राह्मणम्,** गोविन्दराम हासानन्द, दिल्ली
2. चारुदेवशास्त्री, **वाक्यपदीयम्,** मोतीलाल बनारसीदास, दिल्ली
3. जिज्ञासुः ब्रह्मदत्तः (सम्पा.), **अष्टाध्यायी,** रामलाल कपूर ट्रस्ट रेवली, हरियाणा, १९९८
4. विद्यावारिधिः विजयपालः (सम्पा.), **काशिका,** रामलाल कपूर ट्रस्ट रेवली, हरियाणा, १९९७
5. शास्त्री भार्गवः, **पाणिनीयव्याकरणमहाभाष्यम्,** चौखम्बा संस्कृत प्रतिष्ठानम्, दिल्ली, १९८७
6. अग्रवाल वासुदेवशरण, **पाणिनिकालीन भारतवर्ष**, चौखम्बा विद्याभवनम्, वाराणसी, १९९६
7. सुरेन्द्रकुमार, **विशुद्धमनुस्मृतिः,** आर्षसाहित्यप्रचार ट्रस्ट, दिल्ली, १९९४
8. **निरुक्तम्**,भण्डारकर ओरियन्टल् रिसर्च इन्स्टिट्यूट, पुणे १९९५
9. **मुण्डकोपनिषद्**, गीता प्रेस गोरखपुरम्
10. **योगदर्शनम्**, चौखम्बा संस्कृत प्रतिष्ठानम्, दिल्ली
11. **यजुर्वेदः**, वैदिक यन्त्रालयः, अजमेरम्
12. **तैत्तिरीयोपनिषद्**, गीता प्रेस गोरखपुरम्

13. **छान्दोग्योपनिषद्,** गीता प्रेस गोरखपुरम्
14. ब्लुम्फ़िल्ड, **भाषा**, मोतिलाल बनारसीदास, दिल्ली
15. त्रिपाठी रामदेवः, **भाषाविज्ञान की भारतीय परम्परा और पाणिनि,** बिहार् राष्ट्रभाषा परिषद्, पटना